(५.१.२./१६६२) – गव्यम्, सुगव्यम्, [1]अतिसुगव्यम् । 'विभाषा हविरपूपादिभ्यः' (५.१.४/१६६४)–अपूप्यम्, [2]अपूपीयम्, [3]यवापूप्यम्, यवापूपीयम् । 'शरीरावयवाद् यत्' (५.१.६/१६६६)–[4]दन्त्यम्, राजदन्त्यम् इत्येवमादि [5]सिद्धं भवति ।

इत उत्तरं [6]च सङ्ख्यापूर्वपदानां [7]तदन्तविधिरिष्यते । 'पारायणतुरायणचान्द्रायणं [8]वर्तयति' (५.१.७२/१७३६) – द्वैपारायणिकः, त्रैपारायणिकः । लुगन्तायाः तु प्रकृतेर्नेष्यते । द्वाभ्यां शूर्पाभ्यां क्रीतम् [9]द्विशूर्पम् । त्रिशूर्पम् । द्विशूर्पेण क्रीतम् इति तदन्तविधिप्रतिषेधात् 'शूर्पादञन्यतरस्याम्' (५.१.२६/१६९१) इति अञ् न भवति । सामान्यविहितष्ठञेव भवति । [10]द्विशौर्पिकम् (म. भा. २.३४६) । ठञो द्विगुं प्रत्यनिमित्ताल् लुगभावः । तथाचोक्तम्, 'प्राग्वतेः सङ्ख्यापूर्वपदानां तदन्तग्रहणमलुकि' (म. भा. २.३४६) इति[11] ।

निष्क । पण । पाद । माष । [12]वाह । द्रोण । षष्टि । निष्कादिः ॥

## शताच्च ठन्यतावशते । (२१/१६८६)

आर्हात् इत्येव । शतशब्दात् ठन्यतौ प्रत्ययौ भवतः अशतेऽभिधेये आर्हीयेष्वर्थेषु । कनो[13]ऽपवादः । शतेन क्रीतं शतिकम्[14], शत्यम् । अशते इति किम् ? शतं परिमाणमस्य शतकं[15] निदानम् (म. भा. २.३४६) । प्रत्ययार्थोऽत्र सङ्घः । शतमेव वस्तुतः [16]प्रकृत्यर्थान्न भिद्यते । [17]इह तु न भवति, शतेन क्रीतं शत्यं शाटकशतम् (म. भा. २.३४६), शतिकं शाटकशतम् इति । वाक्येन ह्यत्र प्रत्ययार्थस्य [18]तत्त्वं गम्यते, न श्रुत्या । तथा चोक्तम्, शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः (म. भा. २.३४६) इति । चकारोऽसमास इत्यनुकर्षणार्थः । द्वौ च शतं च द्विशतं, द्विशतेन क्रीतं द्विशतकम् । [19]त्रिशतकम् । 'प्राग्वतेः सङ्ख्यापूर्वपदानां तदन्तग्रहणमलुकि' (म. भा. २.३४६) इत्यनया इष्ट्या समासादपि प्राप्नोति[20] ॥

## सङ्ख्याया अतिशदन्तायाः कन् । (२२/१६८७)

आर्हात् इत्येव । सङ्ख्याया अत्यन्ताया अशदन्तायाश्च कन् प्रत्ययो भवति आर्हीयेषु अर्थेषु । ठञोऽपवादः । पञ्चभिः क्रीतः पञ्चकः [21]पटः । बहुकः । गणकः । [22]अतिशदन्तायाः इति किम् ? [23]साप्ततिकः । चात्वारिंशत्कः । अर्थवतस्तिशब्दस्य ग्रहणाड्डतेः पर्युदासो न भवति (म. भा. २.३४६), कतिकः ॥

## वतोरिड्वा । (२३/१६८८)

वत्वन्तस्य [24]सङ्ख्यात्वात् कन् [25]सिद्ध एव, तस्य त्वनेन वा इडागमो विधीयते । वतोः [26]परस्य कनो वा इडागमो भवति आर्हीयेष्वर्थेषु । तावतिकः, तावत्कः । यावतिकः, यावत्कः ॥

---

1. अतिसुगव्यम् नास्ति फ, अतिगव्यम् क. ड. 2. आपूपीयम् ह. 3. यवापूप्यम् नास्ति क. ह. 4. कण्ठ्यम् क. ग. 5. सिध्यति क. 6. वा ड, च नास्ति फ. 7. तदन्तग्रहणम् क. 8. वर्णयति ह. 9. द्विशूर्प्यम् । त्रिशूर्पेण क्रीतम् इति तदन्तविधेरभावात् क. 10. त्रिशौर्पिकम् इत्यधिकम् ब. ड, द्विशूर्पिकम् त्रिशूर्पिकम् क, द्विशौष्टिकम् त्रिशौष्टिकम् ह. 11. कीर्तितम् इत्यधिकम् क. 12. वाह नास्ति क. 13. अपवादो क. 14. वासः इत्यधिकम् क. 15. वाक्यम् फ, शातकः सङ्घः ड. 16. च इत्यधिकम् ह. 17. इतस्तु प्रतिषेधः ब. क. ड. 18. शतत्वं क. ड. ह. 19. त्रिशतकम् नास्ति फ. 20. इति इत्यधिकम् फ. 21. पटः नास्ति अ. क. इ. 22. अतिशदन्तायाम् ह. 23. आशीतिकः ब. 24. संख्यार्थात् ह. 25. प्रत्ययः इत्यधिकम् फ. 26. उत्तरस्य फ.